Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४२५२ - घ

Title शास्त्रदीपिका षष्ठमाध्यायः

Author पार्थसारथिमिश्रः

Extent ८ Age

Subject पू० मीमांसा · अपूर्ण

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ४२५२-घ

प्राणस्तुदीपिकाष्टमाध्यायः (अपूर्ण)

नं० ४२५२-घ

पत्राणि ८ (अष्ट)

© Dharmartha Trust J&K. Digitized by eGangotri

शास्त्रदीपिकायां अष्टमोध्यायः

८००७

४२५२
पत्र
सं. २६५५

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः ॥ अथ विशेषलक्षणं ॥ विध्यंताधिकरणे सौर्यादिष्वानुमानिकेन वचने
न वैदिकीति कर्त्तव्यतास्तीत्युक्तं तस्यैवेदानीं विशेष उच्यते नैकस्य विध्यंतः क्व प्रवर्त्तत इति । प्रथमं ता
वदिदं चिंत्यते । किमेकस्मिन्कर्मणि सर्वधर्मातिदेश उतनेति । ननु विध्यंताधिकरण एवलौकि
कवैदिकविध्यंतसमुच्चयमाशंक्य मिथो विप्रतिषेधादित्यनेन सूत्रेण कथं भावापेक्षायामेकै
नैव तत्कार्यावधारणात् द्वयोः सहप्रवृत्तिरित्युक्तं तेन गतमेतत्सत्यं । समुच्चयस्तत्र निराकृतः । इह
तु सर्वविध्यंतानामेकत्र विकल्पेन प्राप्तिरिति पूर्वपक्षः । उत्तरस्तु नियत एकस्मिन्नेकः प्रवर्त्तते
अन्यथा ह्यनवस्थितः शास्त्रार्थः स्यात्तस्मान्नियमे नैकस्यैव दर्शपूर्णमासादेर्विध्यंत एकस्मि
न्सौर्यादौ प्रवर्त्तते । सत्यमेवं युक्तं कथं त्विदमवगम्यतेऽस्य विध्यंतोऽत्र प्रवर्त्ततेऽस्य नेति ॥ त
दभिधीयते । यस्य लिंगमर्थसंयोगादभिधानवत् ॥ यस्य कर्मणो लिंगं चिह्नमुपस्थापकं
शब्दगतमर्थगतं वा यस्यां विकृतौ दृश्यते तस्य विध्यंतस्तस्यां प्रवर्त्तते यथाग्नेयस्य सौर्ये । साम १
तथा हि निर्वपतिस्तस्थिते न देवतानिर्देश एकदेवतत्वमौषधद्रव्यकत्वमित्यादीन्याग्नेयचोद
नया दृष्टसंबंधानि सौर्यवाक्ये विध्यंतापेक्षे दृश्यमानानि तामुपस्थापयंति । सा च स्वार्थः । ॥

© Dharmartha Trust J&K. Digitized by eGangotri

च भावना तस्याः स्वार्थः। ततः साध्यसाधनांशाविहानपेक्षितत्वादनादृत्यत्वती योंऽशद्वयं
भावरूपोपेक्षः सन्निधियोग्यत्वेर्वाक्यशेषत्वेनात्र संबध्यते। तदयमर्थः। यथाग्नेयेन स्व
र्गः कृतः तथा सौर्येण ब्रह्मवर्चसमिति। एवमनेकदेवते ष्वग्नीषोमीयैंद्राग्न विध्यंतः। आ
ज्यद्रव्यकेषूपांशुयाजस्य। पयोदध्यामिक्षादिषु दैक्षपशौ च सान्नाय्यस्य। पश्वंतरेषु दैक्ष
स्य। एकादशिनेषु सवनीयस्य पशुगणांतरेषु एकादशिनस्य। अव्यक्तेषु सोमस्य। अहर्ग
णेषु सत्रेष्वहीनेषु च द्वादशाहस्य। संवत्सरादिषु गवामयनेस्य त्यादिद्रष्टव्यं। एवमिह
विशेषातिदेशः। उत्तरस्त्वस्यैव प्रपंचः॥२॥ प्रवृत्तत्वादिष्टेः सोमे प्रवृत्तिः स्यात्॥ अग्नि
होत्रे दर्शपूर्णमासयोर्ज्योतिष्टोमे च दोहनावघातामिषवादीनि दृष्टार्थान्यंगानि निराकांक्षीकरण
समार्थानि। तेष्वनिराकांक्षत्वादतिदेशो नास्ति तथापि सोमे दार्शपौर्णमासिकधर्मातिदेशं केन
चिद्धेतुनाशंकमानं निराकर्तुमिदमधिकरणं। कः पुनरसौ हेतुः दीक्षणीयादिष्ववभृथपर्यंतास्वि
ष्टिषु पशुषु च दर्शपूर्णमासविध्यंतोऽतिदेशेन प्राप्यमाणो मनसि विपरिवर्त्तते। तन्मध्यवर्त्ति
त्वाच्च सोमस्य तत्रापि तदन्वयं शंकते। तस्येकशतंप्रयाजाद्यनुयाजाद्दतिच दर्शनमवक्लृप्यते। तस्मा

संख्याविधेः सोमस्यं बंधिप्रयाजाद्यनुयाजद्दष्टिविकृति ष्वेवकल्प्येन नान्यथेसर्पे:१

© Dharmartha Trust J&K. Digitized by eGangotri

नात्र प्रयाजानुवादेन संख्या विधीयते ज्ञापकाभावात् किंतु सोमांग[illegible]दीक्षणीयादिवर्त्ति प्रयाजादि तन्निष्ठा प्रचय सिद्ध संख्या
चान्य घ ×घ× नेस्मत्स्वर्थेइत्यर्थः । नहि तस्येति वक्ष्यमानुपपत्तिर तडक्त वाजपेये ति २
पर २ नि १

मर२२ दि ष्टिः सोमे प्रवर्त्तेतेति । सोमं निराक्रियते । नानपेक्षे प्र[illegible]र्युक्ता । प्रयाजादिकं तु दीक्षणीयाद्यं
गवर्त्ति वाजपेय यूपन्यायेनैकशतसंख्यं प्राप्तमप्रदपद्यत इति नास्ति सोमे गतिदेशः ॥ ३ ॥ इष्टि षु द
र्शपूर्णमासयोः प्रवृत्तिः स्यात् ॥ सोर्यं चरुं निर्वपेदित्यादि ष्टिष्वग्निषु निर्वपत्यादि सामान्येन दर्श
पूर्णमासविध्यंतोपस्थानात्स्यातिदेशः ॥ इदं च यस्य लिंगमित्यस्य प्रपंच इति नातीव पूर्वपक्षे
यतितव्यं । उत्तरत्रापि सर्वत्र ॥ ४ ॥ पशौ च लिंगदर्शनात् ॥ पशावप्यग्नीषोमीये तद्धितेन देवता
निर्देशः । आलभतिश्च दर्शपूर्णमास सादृश्यं नि ष्टावप्यालभतिर्विद्यते ईषामालभेतेति । इष्य
ते च पशोराज्ञैर्हविर्नादि दृष्टार्थांग सिद्धये ति देशापेक्षा । तस्मात्तत्रेष्टिको विध्यंतः ॥ ५ ॥ दैक्षस्य
चेतरेषु ॥ इतरेषु सवनीयरूढादिषु पशुषु प्राणिद्रव्यकत्वसादृश्य विशेषाद्विशसनादिद्रव्य
संस्कारत्वाच्च दैक्षस्याग्नीषोमीयस्य विध्यंतः ॥ ६ ॥ ऐकादशिनेषु सौत्यस्य द्वैरशन्यस्य
दर्शनात् ॥ ऐकादशिनेषु सुत्याकालत्वसामान्यातिरेकाद्द्वैरशन्यदर्शनाच्च । द्वैद्वैरशने यू
पमरत्नत इति सवनीयस्य विध्यंतः ॥ ७ ॥ तत्प्रवृत्तिर्गणेषु स्यात्प्रति पशु यूपदर्शनात् ॥ सौत्रामण्यादि
षु पशुगणेषु गणत्वसामान्याधिक्यादैकादशिनविध्यंतः ॥ ८ ॥ व्याख्याता सुतु सोमस्य । विश्वजिताय जेते
त्यादिषु एकाहेषु द्वादशाहे च किं दार्शपौर्णमासिको विध्यंतः उत सौमिक इति संशये । विशेषाज्ञाद्वादनि राम २

© Dharmartha Trust J&K. Digitized by eGangotri

यदि यागेन देवता विधिः तर्हि कथं तदन्वयो न आहुतकृताय्याख्येति यागं विना देवतात्वानिर्वाह इत्युक्तो क्वा ग्रहणसंयुक्ता देवता यागम
भिलषति यागोपि देवताभिलाषी तयोरर्थान्तरावदग्घरयवत्सेब घटस्पर्शः ४

६ ३

यत्तमे शास्त्रे ब्रूमः। सोमिकं स्यादव्यक्तत्वसामान्यात्॥ केयमव्यक्तता। यागार्थतया विनियुक्तदे
वताविरहः। यत्र तद्धितचतुर्थीमंत्रवर्णैर्यागार्थतयैव देवता विनियुक्ताः। तद्व्यक्तं इतरत्त्वव्यक्तं। त
था च विश्वजिदादयः सोमयागान्न्चैं [illegible] यवं गृह्णातीति तद्धिते नैव देवतापि सोमे विहितानयागे दे
वतानेन विधीयते किंतु ग्रहणे। तद्गता यास्कपक्षादार्थिको यागसंबंधो न तु प्रथममेव यागान्वय
इत्यव्यक्तत्वं। अतः सोमविध्यंतो विश्वजिदादिषु॥ ६॥ गणेषु द्वादशाहस्य॥ द्विरात्रादिष्वहर्गणेष्वव्य
क्तत्वं गणत्वं चाधिकं विद्यते तस्माद्द्वादशाहविध्यंतः। एवं च पत्नीसंयाजान्तान्यहानि संतिष्ठंत इत्या
दयो गणधर्मा लभ्यंते ।१०॥ गव्यस्य च तदादिषु॥ संवत्सरसत्रे ह्यादित्यानामयनप्रभृतिषु संवत्स
रसत्रत्वसामान्यात्संवत्सरनियमलिप्सया च गवामयनविध्यंतः॥११॥ निकायिनां तु पूर्वस्यो
त्तरेषु प्रवृत्तिः स्यात्॥ साहस्राः साद्यस्क्रा इत्येकसंज्ञया युगपत्स्वस्त्यपक्षात्क्रमेण विहिता
यागा निकायिन इत्युच्यंते। तेषां प्रथमो धर्मवान् उत्तरेषु किं ततो धर्माः प्रवर्तंते उत सोमिकादि
ति संशये। अव्यक्तत्वात्सोमिकादिति प्राप्ते एकनिकायवर्तित्वमेकनामत्वं चावांतरसामा
न्यमधिकमस्तीति पूर्वविध्यंत उत्तरेषु। तथा यावदस्य साहस्रस्येत्यादिधर्मदर्शनं पूर्वधर्म
पूर्वस्मिन्साहस्रे गवां सहस्रं दक्षिणामाम्नायोत्तरस्मिन्दर्शयति यावदस्य साहस्रस्योत्तरा गोः समाहिता भवति तावदस्माल्लोकादसौ लो
क इति तथा घ साद्यस्क्रे सांउरित्रवत्सरः सोमक्रयणः [illegible] पितमेव दर्शयति स्त्री गोः सोमक्रयणी व्याहृत्ता
ह्योषी स्पष्टं कृति ९

© Dharmartha Trust J&K. Digitized by eGangotri

यायस्य कर्मणः प्रकृतिस्थादीयाः फलादयस्तस्या मित्येवं परस्परमतिदिश्यंते न वेति संदेहगलमिथः शब्दार्थः ३

न्वे६ सो२

प्रासिं दर्शयति। १२। कर्मणस्तस्य प्रकृतत्वात् फलनियमकर्तृसमुदायस्यानन्वयस्तद्धेतुधनत्वात्।
फलं स्वर्गः। नियमो यावज्जीवकत्वं। कर्त्ता स्वर्गकामः। समुदायस्त्वाग्नेयादीनां षण्णां मिथः सा
हित्यं। किमेते विकृतिषु सौर्यादिषु मिथः प्रदिश्यंते नेति संशयः। तत्र प्रकृतिसंबंधाद्धि कृतावति
देशनं। प्रयाजादिवदेतेषां दृतिप्राप्ते विधीयते। प्रकृत्येव निवद्धत्वाद्धि कृत्यासहनान्वयः। नावा
तिदेशतः प्राप्तिरित्यंशावान्वयादते। कथं नावापेक्षा हि विकृति न्यावना। यदेव प्रकृतावित्युक्तं नावे
न गृहीतं तदेवापेक्षते। न च फलादीनामित्युक्तं भावार्थः। फलनियमयोः पुरुषार्थत्वात्। स्वर्गकामो
पि न क्रमार्थः कस्मै वतदर्थमित्युक्ते स्वर्गकामाधिकरणे। तथाऽग्नेयादीनि षडपि तुल्यवत्फलं प्र
तिकरणत्वेनोपदिष्टानि नान्योन्यस्यांगं। तेन नैकस्य विकारेऽन्यानि प्रवर्तंते। न चाप्रवर्त्तमा
नेषु तत्साहित्यं भवति। तस्मान्न फलादीनामतिदेशः। माभूदित्युक्तं नावांशेनातिदेशः फलापे
क्षयैव विश्वजिदादिष्वश्रुतफलेषु फलमतिदिश्यतामिति चेत् नैवं। न ह्यपि फलं विकृतावतिदे
शे विधीयमानमंगमेव स्यात् न फलं। न फलं विकृतिं प्रति विधीयते फलमेव प्राकृतं यथाव
स्थितं उद्दिश्य विकृतिर्विधीयतामिति चेत्। न तस्य विकृतिः साधनं भवितुमर्हति। प्रकृत्यैव
लब्धसमुदायोतिदेशः। विकृतिपरिच्छेदकत्वेनेवत्वातिदिश्यतामेवं सौर्यादि वि२
वेकत्वात्करणस्य परिशेषाभावादर्थलोपे ...
भ्यादौ करण बहुलं विकृतौ न नापि प्रकृतिवत्तत्र सा समुदायसद्भावान्न प्राकृतस्यातिदेशो युक्त इति दिक्।५

राम २

© Dharmartha Trust J&K. Digitized by eGangotri

स्ववाक्यगतयाऽवरुद्धत्वात्तस्मान्न विकृतेः प्रकृतिफलसंबंधः ॥१२॥ गुणकामेष्वाश्रितत्वात्प्रवृ
त्तिः स्यात् ॥ इह गुणफलानि गोदोहनेन पशुकामस्य प्रणयेदित्येवमादीनि तत्साधनभूताश्च
गोदोहनादयः किं विकृतिषु प्रवर्त्तेरन्नेति संशयः । तत्र प्रधानफलं प्रधानेऽवबंधनत्वात्तस्य च विकृ नि२
तिष्वप्रवृत्तेर्मा नाम प्रवर्त्तिष्ट । गुणफलं तु गुणप्रवृत्त्या प्रवर्त्तितुमर्हति । तथा हि । प्रणयनं ता
वदतिदिश्यते तत्साधनभूतं च गोदोहनमनेनागमपि साधनत्वाच्च मस्तव प्रवर्त्तते । तत्प्रवृत्त्या
च तत्साध्यं फलमपि प्रवर्त्तेत । यथा प्रधानाश्रितदध्यादिसाध्यमिंद्रियादि दध्यादेर्होमसा
धनत्वेन विकृतिषु प्रवृत्तेः प्रवर्त्तते ऽस्य ते । न हि गोदोहनादीनामित्थंभावेन संग्रहः ॥ इत्थंभावा
तिदेशेन तेषां नातोऽतिदेशधीः । न हि यत्किंचिद्यथाकथंचिदपि प्रकृतेः साधनं तत्सर्वमतिदिश्य
ते । कथंभावापेक्षा हि विकृतिचोदना सादृश्योपस्थापितां प्रकृतिचोदनामालोच्यते स्यास्यं
शाः पाः साध्यसाधनांशावनाकांक्षितत्वादनादृस्य तृतीयमित्थंभावांशं वाक्यशेषबलेन गृह्णा
ति । तत्र यत्प्राकृत्यां चोदनायामित्थंभावरूपेण गृहीतं प्रमाणांतरेण कथंचित्साधनभावमु
पनीतं गोदोहनादि तत्स्यकः प्रसंगो विकृतौ । माभूदतिदेशः ॥ प्रणयनत्वोस्याश्रयभूतस्य विकृ

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मिंश्चेति· फलार्थं दध्यादेरप्रवर्त्तमाने तद्दधिभिः कामोपि प्रवर्त्तत इति संमतिभाष्यार्थः। वार्त्तिककारास्त्वाहुः। भवतु दधिरवादि त्यो :कः त्वर्थं शेन
प्रवृत्तिस्तत्फले तु न कः त्वर्थं तत्फलं संभवतीति· यदि च फलगुणार्थस्या ऽगुणप्रयासाप्रवर्त्तेत इत्यनुविपरीतं तादर्थ्यं फलार्थत्वा ऽगुणस्य कि च· असत्यपि
अतिदेशो स्य च व फलार्थं गुणोपादानं यथाविज्ञाताश्रयलाभः। अपि प्रामीया द्रव्य प्रयुक्तं हि नियोजनं स्वदिरस्याश्रयः। अपूर्व विशेषप्रयुक्तं

तावपि नावास्तदाश्रितं गोदोहनमपि पुरुषः कामनावशात् प्रयुंक्ताम् इति चेत् न। वैगुण्यात्।
श्रुतिदिष्टस्यांगभूतस्य चमसस्य विना शास्त्रेण न पुरुषेच्छामात्रेण युक्तो बाधः। तदर्थे हि
वैगुण्यं स्यात्। अवैगुण्ये तु नवतु कामस्यापि प्रवृत्तिः। तथा हि तत्राप्यकारः। तस्मिंश्च प्रवर्त्तमा
ने कामोपि प्रवर्त्तत इति। किं च। यद्दर्शपूर्णमासादर्वसाधनभूतं प्रणयनं तदेवाश्रयः। ता
दृशस्यैव प्रकृतत्वात्। न च विकृतौ तादृगस्ति। तस्मादाश्रयाभावादपि न गोदोहनतत्फलयोः
प्रवृत्तिः॥१४॥ एककर्मणि विकल्पो विन्नागो हि चोदने कत्वात्। सोयमाग्नेयविकार इति विवक्ष्य
ते। आग्नेयश्च पौर्णमास्यमावास्ययोरुत्पन्न उभयसंज्ञः। तेन चतुर्होत्रा पंचहोत्रा वा तस्य
कालद्वये निमर्शनं। तत्र सोयं मंत्रद्वयं किं पौर्णमास्यमावास्याकालयोर्व्यवस्थया प्रयो
क्तव्यं उत अव्यवस्थयेति। व्यवस्था प्रकृतौ दृष्टा प्राप्यते विकृतावपि। प्रकृतावार्थिकी हेषा
विकृतौ नातिदिश्यते। चतुर्होत्रा पौर्णमासीं पंचहोत्रामावास्यामिति समुदायद्वारेण मंत्रयो
रुपदेशः प्रकृतत्वान्न कालद्वारेण तस्याप्रकृतत्वात्। अतः समुदायद्वयवर्त्तिन आग्नेयस्यैव
चावैगंएकार्थत्वाद्विकल्प्येते। तत्र पौर्णमासीकाले पौर्णमासिके हविरंतरे सहास्मिन्मश्च
प्रकरणेन सन्दीपते। स चापूर्वविशेषसाधनत्वं प्रणयनं तस्यैव प्रकृतत्वात् ननु प्रणयनमात्रं। न च तद्विकृतावस्ती साश्रया
त्वान्नगुणो न तरां न स्फलं प्रवर्त्तेत इत्यर्थः। न चक्षुषि [illegible] ते। तन्न द्वितीयासु स्वार्थो· प्रातिपदिके तु कर्मसंबंधि हविः
लक्षणया [illegible] ते· कर्मसंबंधिहविरधिकरणं द्वितीया·२
ननु कालद्वारेण वा चनिकी व्यवस्था स्यात् कथमार्थिकीत्यत आह३

© Dharmartha Trust J&K. Digitized by eGangotri

ये तावत्सम्मुमनादिसंख्येन नामधेयेनोपधावति स एवैनं ब्रह्मवर्चसेन समयति इति । आग्नेयेष्ट्यं गिरसो नाहृतउन्नमाः स्वर्गं लोकमा यं स्तो यदग्नावास्तव भ्यायं स्वपुरोडाशीकूर्मं भूत्वा प्रसर्पं तमपश्यंस्तम ब्रुवन्निंद्राय ध्रियस्व हस्यते ध्रियस्व विश्वे भ्यो देवेभ्यो ध्रिय स्वेति स नाहन ध्रियेत मग्नुवन्नग्नये ध्रियस्वेति सोऽब्रवीत् ध्रियेहं यदाग्नेयोऽष्टाकपालो मावास्यायां पौर्णमास्यां चाच्युतोभवति

मानमाग्नेयमविरोधाच्चतुर्होत्रा लिप्सेष्टं । एवममावास्याकाले पंचहोत्रा । न तु कालकृता व्यव स्था तत्र शास्त्रार्थः । तस्माद्धि कृता व्यवस्था ॥ १५ ॥ लिंगसाधारण्याद्विकल्पः स्यात् ॥ इष्टि षुद र्शपूर्णमासयोः प्रवृत्तिरित्युक्तं । तत्र पौर्णमास्यामग्नेयादीनां कस्य कुत्र वृत्तिः । विशेषानावादनिय मः । सा दृष्यविशेषात्वेकदेवत्ये सोर्याद्यावेकदेवत्यस्याग्नेयस्य प्रवृत्तिः । अनेकदेवते त्वग्नी षोमीयेंद्राग्नयोः । आग्न्यादिद्व्येकेपूर्णांमुयाजादेः । कथं पुनरेकदेवत्यत्वमाग्नेयसौर्ययोः । वाक्यशेषादिति दर्शितं प्राक् ॥ १६ ॥ विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात् ॥ ऐंद्रेष्टुपुरोडाशेषु किं देवतासामान्यात्सान्नाय्यविधं तदुत हविःसामान्याद्दोषधविधं तदिति सं शये तथाग्नेयेप्यस्ति देवतासामान्याद्दोषधस्य हविःसामान्यादपि सान्नाय्यस्येति देवतासामा न्यहविःसामान्ययोः किं बलीयदिति चिंत्यते । विशेषानावादनियमं मुख्यत्वप्राधान्याभ्यां वा देवतायाः प्रा बल्यं मन्वानस्योत्तरं । हविषस्त्वज्यमानत्वात्प्रत्यासत्तिर्हि कर्मणि । उद्देश्यमात्ररूपत्वाद्देवतायाः दवस्थि ता । यच्च प्रत्यासन्नं तेनैवोपस्थितं विधानं तमासाद्य निराकांक्षं कर्मन बहिरंगभूत देवतोपस्थापितमपेक्षते । यद्यपि प्रातिपदिकार्थत्वाद्देवता मुख्या तथापि तत्स्वरूपवेलायां आकांक्षा भावादनतिदेशः । कर्मविधुत्तर

फलसंततत्या
योगान्य

ऽर्थे न कर्म

ग्रहद्वारेण देवताउपकरोति हविस्तु स्वरूपेणेति भावः । नैनं प्रत्यासत्तिरूपेण निशेषः । विध्येकोपस्थितेस्तु भाव्या समविशिष्टेसन न च पदार्थवेलायां विध्येनापेक्षा किंतु वाक्यार्थवेलायां तन्न पदार्थवेलायां देवतामुख्या तथापि वा ति ग्राह्यमत्रेति ३ क्यार्थवेलायोतिरोहितत्वाय स्वादनतिदेशः । हविरेव तु कर्मप्रसासत्वात् लब्धत्वादतिदेशं करिसूर्यः ९

© Dharmartha Trust J&K. Digitized by eGangotri

पयो ॥ अत्रबरवोयागा इति सिद्धांतः॥

कालं तु मत्यास्तत्रैर्हविः सामान्यं बलीयः। प्राधान्यं तु देवतायां नवमे निराकरिष्यते। किं चौषधसा
न्नाय्यधर्मास्तत्र चौषधधर्माः सर्वे बाध्येरन्न संभवात्। यथा यथं तु प्राप्नोति न कस्यचिद्बाधः। तस्मा
द्धविः सामान्यं बलीयः॥१७॥ हिरण्यमाज्यधर्म तेजस्त्वात्॥ हिरण्यशकलं चरावाज्यौषधयोः कस्य ति
ष्ठंतः स्यात्। उज्ज्वलत्वसामान्यादाज्यस्य। विशदत्वादौषधस्य वा। विचरुशद्ध संयोगाच्च तद्धर्माः॥१८॥
मधूदके द्रवसामान्यात्पयोविकारः स्यात्॥ दधि मधु घृतं धानाः तंडुला उदकं मित्यत्र मधूदकयोः
पयः प्रवर्त्तेत उताज्यमिति संदेहे स्वाभाविकद्रवत्वसामान्यात्पयः। नैव। असत्यपि स्वाभाविक
द्रवत्वेऽग्निसंयोगादाज्येपि द्रवत्वसद्भावाद्वर्णसामान्याधिक्यात्पयो धर्माणां च दोहनादीनामसं
भवादुत्पवनादीनां संभवादाज्यविध्यंतः। वर्णसाम्यस्य चाधिक्याद्द्रवत्वस्याविशेषतः। अनुग्र
मधू४ हाच्च धर्माणां माज्यधर्मदकं॥१९॥ ॥ इति शास्त्रदीपिकायामष्टमाध्यायस्य प्रथमः पादः॥ वाजि
न्ने सोमवत्त्वं सौत्रामण्यां च ग्रहेषु ताच्छब्द्यात्॥ वाजिनयागे सौत्रामण्यां च ग्रहेषु चाश्विनादिग्र याम ५
हेषु किं सौमिको विध्यंत उतनैष्टिक इति संशये। सोमो वै वाजिनं। सुरा सोमः इत्यसोमे सोमशब्दस्तद्धर्माति
देशार्थोऽग्निहोत्रशब्दवत्। तस्मात्सौमिकः। प्रशंसार्थस्त्वयं सोमशब्दो न विधानार्थः विध्यश्रवणात्।

आमि[illegible] [illegible]सोऽस्मि इति सुराग्रहास्तत्र

© Dharmartha Trust J&K. Digitized by eGangotri

वैरूतं पयो वाजिनं वैरूतं चौषधं सुरेति दृष्टम् जेपि द्रव्यसामान्या त्तयोक्तं द्वि प्यं तः। वाजिनेस्त सुप्यातिदेशो न पयागे गानुष्ठानं आमि
क्षायागार्थे रेवीगेः प्रसे गादुपकारसिद्धेः पशुपुरोडाशादिकं तिन्नेयं १ प्रतिबंधाभावे स्वभावतोगतिमत्त्वमधिकं तानि यामक मिस अर्थः एवंसघ
स्मा१ ७ स्कालसमपि

तद्धविःसामान्यादेष्टिकोक्ताग्निने पयोविध्यंतत्सुराग्रहेषुचौषधं॥१॥ पशुःपुरोडाशविकारःस्याद्देव
तासामान्यात्। पशावग्नीषोमीये दर्शपूर्णमासयोः प्रकृतिरित्युक्तं। तत्र देवतासामान्यादग्नीषो
मीयपुरोडाशः प्रवर्त्तते। हविःसामान्यमपि पुरोडाशेनैव विद्यते। द्वयोरपि घनत्वात्। सान्नाय्यं वा
प्रवर्त्ततेहविःसामान्यात्। सान्नाय्यं हि पशुतः प्रभवति। पशुरपि पशुप्रभवः। सिं दधित्वाच्च पशुसान्ना
य्ययोः पशुप्रतीतः सान्नाय्यमुपस्थापयति। सान्नाय्यपात्रे चोखापश्चो दृश्यमाना नस्य लतिलं स्र
चयति॥२॥ दध्नःस्यान्मूर्त्तिसामान्यात्। तत्रापि दध्नो विकारः स्यात् घनत्वसामान्यात्। पयसो वा तद्वि
साक्षात्पशुप्रभवं दधितु तद्द्वारेण पशुरपि साक्षात्पशुप्रभवः। गतिमत्त्वं च पशुपयसोस्तुल्यं। तदाधि
कं दधितः पयसः॥३॥ आमिक्षोभयभाव्यत्वादुभयविकारःस्यात्॥ आमिक्षायागः सान्नाय्यवि
कारइत्यसंदिग्धं। दध्नः पयसो वेति चिंत्यते। दधिक्षीरं च संसृष्टमामिक्षेत्यभिधीयते। उभयोश्च
रसस्तस्यां दृश्यते तो द्व्यात्मिका। विशेषाग्रहणात्तस्मादुभयोर्विकृतिर्भवेत्॥ तेनैव पयस्विवाक्य
तु सम्यग्गुणतः पयः। दधि द्वितीयानिर्देशात् प्रधाने तेन सोपदं। दध्येव प्रतिनिर्दिश्यते न वध्ना
ति देवतां दध्येवातो हविस्तस्मात् सायं दोहविकारता। पयसस्तु प्रधानत्वं तत्र कर्मसमाप्तितः॥

अनोपधत्ववर्णसाम्यादिष्टिनिरासाशयः४ सावैश्वदेवी तिर

© Dharmartha Trust J&K. Digitized by eGangotri

एकविध्यं तन्निराकांक्षे कानोदनानापरमपदस्य आरा च विशेषग्रहणाभिसाशयेन द्वितीयं पक्षमाह तदग्नि

तथापि कर्मविप्रतत्वात्प्रधानमत आह कर्मतोपीति· तस्यैवेत्याद्यर्थस्तद्दाः पयः पुराः। अतः प्रधानत्वात्· ननु देवतायोगि हविः नच पयस्तथेत्य
तआह तस्यैवेति· ननु वैश्वदेवीति स्त्रीलिंगनिर्देशादामिक्षायां देवतायोगो न पयसो विलिंगत्वादत आह आमिक्षापीति· दध्नासंसृष्टं पयः
४ अत्र सार २४ आत्मनो पायि चोदितः सत्रं यजति चोदिताह गणो हीनः ४ एवामिक्षेत्यर्थः १

दध्नाहि नीयमानेन तदेवव्याप्यते पयः। कर्मतोपि प्रधानत्वं तस्य स्यात्संप्रदानवत्। सर्वनाम्नापरा
मर्शस्तस्यैवातोनकल्प्यते। तदेव दधिसंयोगात् घनीभूतममतोहविः। तस्यैव देवतायोगश्चामिक्षा
पितदेवनः। प्रातर्दोह विकारत्वमामिक्षायास्ततः स्थितं॥४॥ सत्रमहीनश्च द्वादशाहस्तस्योनयथाप्र
वृत्तिरैककर्म्यात्॥ गणेषु द्वादशाहस्य त्युक्तं। द्विविधश्च गणः सत्राण्यहीनश्च। द्वादशाहोप्युभया
त्मा तस्योभयविधस्याप्यनियतात्मना सर्वत्र प्रवृत्ति विशेषाभावात्। सत्रेस्यैव तु सत्रेषु प्रवृत्तिः स
त्रसाम्यतः। तथाहीने प्यहीनस्य सुसदृक्त्वादिति स्थितं॥५॥ अन्यतरतोतिरात्रत्वात्पंचदशरात्रस्या
हीनत्वं कुंडपायिनामयनस्य च तद्वत्तेषु हीनत्वदर्शनं [illegible]त्॥ पंचदशरात्रस्य कुंडपायिनामयनस्य च
किं सत्रविकारत्वमुताहीनविकारत्वमिति चिंत्यते। तदर्थं च किमनयोरहीनत्वमुत सत्रत्वमिति वि[illegible]र्यते।
तत्रोपर्यतिरात्रत्वाद्दूरमध्यादिवदेतयोरहीनत्वं उक्तं॥ नैव मासनो पायिचोदनात्। सत्रसंज्ञानकांडे
चसमाम्नातमिदं द्वयं तस्मात्सत्रमतः सत्रविध्यंतोत्र प्रवर्तते॥६॥ ॥इति शास्त्रदीपिकायां अष्टमस्य
द्वितीयः पादः॥ हविर्गणोपरमुत्तरस्य देशसामान्यात्॥ आग्नावैष्णवमेकादशकपालं निर्वपेद्दक्षिवरन्
सारस्वतं चरुं वार्हस्पत्यं चरुमिति तत्र संदेहः। किं प्रथमस्याग्नेयविध्यंतस्तृतीयस्याग्नीषोमीयविध्यं
तउतविपरीतमिति। स्थानसामान्यात्प्रथमतृतीययोः प्रथमतृतीयविध्यंत प्राप्तो उच्यते। प्रथमस्य

© Dharmartha Trust J&K. Digitized by eGangotri

गुरुत्वे नरपृष्ठस्योर्लिंगयोः कोविशेषोत आह देवतेति ग्रचयगम्यादितरेतरापेक्षत्वप्रतीतिकाद्वैरूप्यसाम्याच्छब्दावगतमनपेक्षत्वप्रतीतिकं चैद जनकसप्तरात्रेणपद्येतेति त्रिवृत्तिनवर्च स्तोमकानि त्रिवृत्पंचदशः सप्तदशः एकविंशस्त्रिणवस्त्रयस्त्रिंशाः वतासामान्यमेव बलवदिति ज्ञावः
त्येवं द्वादशाहस्थः पच्चस्ति ४ इहेति श्रिथिगतसप्तरात्र शब्दो व्यत्ताद्धादः इत्यर्थः ६

द्विदेवत्यत्वादग्नीषोमीयविध्यंतः। तृतीयस्यचैकदेवत्यत्वादाग्नेयविध्यंतः। देवतासामान्यमुत्पत्तिवेलायामेवेशीघ्रंगम्यते। स्या नसामान्यं त्वन्यापेक्षत्वाद्विलंबितत्वाद्दुर्बलं। तस्माद्देवतासामान्यात्प्रथमतृतीययोस्तृतीयप्रथमविध्यंतः। १। गणचोदनायां यस्य लिंगं तदावृत्तिः प्रतीयेताग्नेयवत्। जनकसप्तरात्रेश्रूयते। चत्वारि त्रिवृदहान्यग्निष्टोममुखानीति। तत्र किमेषु प्राकृतिकस्याद्यस्याह्नस्त्रिवृतो विध्यंतस्य चतुर्ष्वप्यावर्त्तनी यउत त्रिवृदादीनां चतुर्णामपि क्रमेण चतुर्षु प्रवृत्तिरिति संशये। एवं वत्संघातसामान्यस्य दुर्बलत्वात्त्रिवृत्त्वसामान्येनाद्यस्यैव प्रवृत्तिः। नैवमिहुं सहचोदितानां संघातोपिशाद्र स्त्रिवृत्त्वमपि तत्त्वसंघातसामान्यं प्रधानगतमंगाभूतस्तोत्रीयागतात्त्रिवृत्त्वाद्बलीयइति तद्दर्शनचतुर्णामपि द्वय्याघानां चतुर्षु प्रवृत्तिः। एवं चाग्निष्टोममुखानीत्यपवादो युज्यते। अन्यथा सर्वेषामग्निष्टोमत्वं स्यात्। आद्यस्याग्निष्टोमत्वात्तत्राग्निष्टोममुखानीति न घटते। २। कालाभ्यासेपि बादरिः कर्मभेदात्॥ षट्त्रिंशद्रात्रे श्रूयते। षडहा भवंति चत्वारो भवंतीति। तत्र विचार्यते किमेषु चतुर्विंशत्यहस्सु द्वादशाहिकस्य दशरात्रविध्यंतस्य प्रवृत्तिरुत षडहस्यैव चतुरावृत्तिरिति। तत्र। चतुर्विंशतिरेतानि चत्वारः षडहा इति। चोद्यंते हानि तेनैषु द्वादशाहः प्रवर्त्तते॥ उच्यते। चतुर्विंशतिसंख्यात्र गणाः साक्षान्न
चतुरिति षडहानां चतुष्ट्वं च चतुर्विंशसहानि भवंतीत्यर्थः दशरात्रेति आद्यो सौप्रायणीयोदयनीयो विहायेत्यर्थः। तत्रेति पृथक्त्व
निवेशित्वात्तसंख्याया ओतत्त्वावसामंजस्यात् चत्वारः षडहाइत्यनेन चतुर्विंशतिरहान्येतामवोद्यंते तेनाहर्गणत्वसामान्याद्द्वादशा
हस्य वृत्तिः षडहावृत्तौतु चतुः षडहइतिस्याद्दिति भावः ३

© Dharmartha Trust J&K. Digitized by eGangotri

चतु ऋतषडहशब्देनशीघ्रांतकर्मप्रवृत्तोनिश्चितायांनानुमानिकेनगणेनधर्मप्रवृत्तिर्विलंबितायुक्तेत्यर्थः। चतुष्
ट्यस्यनिवेशानीसंख्यावृत्तोनयुज्यतेइतितत्रनापितुल्यं। दशरात्रप्रवृत्तावप्याद्यस्यैवसंख्याश्रवणादित्याशयः २

चोद्यते। चतुःसंख्येस्तषडहेरनुमानेनगम्यते। चतुःसंख्यास्तषडहाः प्रत्यक्षेणैववचोदिताः। तस्मा(त्तु)इह वि
ध्यंतःशीघ्रमत्रावगम्यते॥ ३॥ संस्थागणेषुतदभ्यासःप्रतीयेतकृतलक्षणग्रहणात्॥ शतोक्थ्यंभवति
शतातिरात्रंभवतीतिश्रुतं। तत्रसंशयः किंज्योतिष्टोमस्यशतकृत्वोभ्यासउतद्वादशाहप्रवृत्तिरिति। तत्रो
क्थ्यादिशब्दानांज्योतिष्टोमनामत्वंमन्वानस्तमेवद्वादशस्थमप्यनूद्यशताभ्यासउपादेयोगुणोविधीयत
इतिमन्वानस्तस्यैवाभ्यासमाह। संस्थानिमित्तास्त्वेतेनकृतोःकस्यापिवाचकाः। सन्निधानावतःसंस्था
विशिष्टगणचोदना। तस्माद्द्वादशाहविध्यंतः॥ ४॥ गणादुपचयस्तत्प्रकृतित्वात्॥ शतोक्थ्यंभवतीत्यत्र
द्वादशाहिकोदशरात्रोदशकृत्वः प्रवर्त्ततइत्युक्तं। तस्मिंश्चदशरात्रेत्रितोद्वावग्निष्टोमो। तत्रशतोक्थ्य
प्रतिदशकंद्वौद्वावग्निष्टोमोउक्थ्यसंस्थयावर्धितव्यौ। तत्रागम्यमानेषूक्थ्यस्तोत्रेषुसंशयः किंद्वा
दशाहिकोक्थ्यस्तोत्रविकारास्तेषुहिकेचिद्विशेषाः प्राकृतेभ्यःस्तोत्रेभ्योविद्यंतेउतज्योतिष्टोमोक्थ्य
विकाराइति। तत्रद्वादशाहविकारत्वात्अस्यगणस्यतदीयेषूक्थ्याहःसुयान्युक्थ्यस्तोत्राणितद्विका
रत्वमेवास्मिन्नागंतूनामुक्थ्यस्तोत्राणांयुक्तं। नैतद्युक्तं। ज्योतिष्टोमेहिउक्थ्यस्तोत्राणामुत्पत्तिः। द्वादशा राम ७
हेत्वतिदेशप्राप्तानांतेषामेवविशेषाविहिताः। यत्रचोत्पत्तिस्तत्रएवागमनंयुक्तंनयत्रातिदिष्टाः। नहित्ति

तत्रेति दशवारंदशरात्राभ्यासेप्रतिदशरात्रंआद्यंतोद्वावग्निष्टोमावितिविंशति उक्थ्या२
स्तेषुशतोक्थ्यत्वसंपत्तयेउक्थ्यनामकस्तो...
...वारस्त्रेया। ६...

© Dharmartha Trust J&K. Digitized by eGangotri

तस्य इति संख्याविशिष्ट ऋग्विशेषवाची गायत्रीशब्दोऽनुष्टुप्शब्दसामानाधिकरण्यात् तद्वयवेसंख्यामात्रसाम्येनानुष्टुप्सु तस्य गौणो ननु स्वप्रत्ययेः प्रथमार्थे न सिः इह न गौणत्वे हेतु नास्ति । न च चोदकाबाधो हेतुः अतिदेशे न तत्र सधर्मकृतवाधापोगात्तद्दृष्टाशयः । उपचयउक्ष्या नां वृद्धिः । अपचयोक्तासः ॥ ढक्कौ च ति ति तायां न तत्र तियोगितया ऊरुसं चितानाप्रसक्तेः सर्पः ॥ ८

स्तुकोन्निस्तुकाघा चितु मौर्हन्ति सत्यन्यस्मिन्नेव निस्तुके । तस्माज्ज्योतिष्टोमिकानामेवोक्थ्यादीनां प्रवृत्तिः ॥ ५ ॥
गायत्रीणामवच्छेदः प्रकृत्यधिकारात्संख्यालाद्दग्निष्टोमवद्व्यतिरेकात्तदाख्यातौ । बृहस्पतिसवे प्रकृतिनो
गायत्र्यैष्टुभजगतिषु नानाछंदःसु प्राप्तेषु छंदोऽन्तराणिवृद्दस्य गायत्रीनियमागायत्रमेतदहर्भवतीति । तत्र संश
यः । किं त्रिष्टुबादिषु चोदकप्राप्तेष्वक्षरलोपं कृत्वा गायत्री संपादयितव्या उत दाशतय्यां भ्य उत्पत्तिगायत्र्य
आनेतव्या इति । तत्र संख्यामात्रवाचकत्वाद्गायत्रीशब्दस्य प्राकृतीषु चोदकप्राप्तास्वक्षरावलोपेन विरु
ध्यते । तस्मात्तास्वेवाक्षरलोपः । तथा तिस्रोऽनुष्टुभ इत्यत्र तस्रो गायत्र्य इत्याद्युपपद्यते । तत्रोच्यते । संख्यामा
त्राभिधायित्वे सर्वत्रैवं प्रसज्यते । मंत्रांतरे घटो दौवत स्मात्संख्यान्विता मंत्रं । अष्टाक्षरैस्त्रिभिः पादैर्यु
क्तामन्निदधात्यसो । तिस्रोऽनुष्टुभ इत्यत्र गौणः शब्दो न मुख्यतः । तस्मादुत्पत्तिगायत्र्य आनेयाः । एवाधिक
र णेऽप्युपचयश्चिंतितः । तत्प्रसंगात्तु अपचयो यं चिंतितः ॥ ६ ॥ ॥ इति श्रीशास्त्रदीपिकायां अष्टमाध्या
यस्य तृतीयः पादः ॥ ॥ दर्विहोमो यज्ञाभिधानं होमसंयोगात् ॥ प्रपंचिते तिदेशे पवादं निवक्ष्याद दर्विहो
माह्वयमागतः । तत्प्रसंगेन वषट्कारेणाजुहुयात् दर्विहोमं कुर्यादित्यर्थवाद गतो दर्विहोमशब्दो दह
यमागतः । किं गुणविधिर्नामधेयं वा । नामापि किं लौकिकानामेव उत वैदिकानामपि वैदिकानामपि
किं यद्युत्पत्तिनामपि किं वा जुहोत्युत्पत्तीनामेवेति प्रसंगाच्चिंत्यते । तत्र होमशब्दसंयोगात्तस्य च कर्मव

© Dharmartha Trust J&K. Digitized by eGangotri

यदेना रिष्ठ होमविकारत्वाद् दर्विहोमानां तदा त्र्यंबकहोमेपि तथात्वे अत्र तिष्ठिताचे त्र्यंबकाद्यसाधूनेंसावर्हिः संनि
धेते न प्रयाजाद्यङ्गजातमस्मिन् धेनीरन्वाह इति नारिष्ठानामभिधार्बर्हिःसामिधेनीनां अनुवादो नस्यादिति चाको
तस्मात्तद्विकारत्वा· दर्शपूर्णमासयोरिध्मादीनामंगप्रध्यानार्थत्वान्नारिष्ठागभूतानामिस्क ॥१०
त्वनत्वात्तत्प्रधानत्वाच्च समासस्य कर्मनामत्वं। तत्र लौकिकानां स्थालीपाकादीनां कर्तरि दार्विहो
मिकशब्दप्रयोगात्तेषामेव स्यात्। वैदिकेपि वास्तुहोमे प्रयोगाद्धोमत्वाविशेषाच्च वैदिकानामपि
तत्र यज्ञत्वस्य तेनामपि। चतुरवत्तं जुहोतीत्यादिना होमत्वापत्तेस्तेषामपि। न यागस्य होमत्वापत्तिः या
गान्तु कर्मान्तरं प्रोक्षणादिवत्संस्काररूपं विधीयते। अतो जुहोत्युत्पत्तीनामेवाग्निहोत्रादीनां नामस्या
त्। यत्तु गुणविधित्वं आशंकितं तच्चोद्यमात्रं। तत्र तत्प्रख्यन्यायसिद्धमेवोत्तरमुपसंहृतं। ४। तास्मिन्सो
मः प्रवर्त्तेताव्यक्तत्वात्॥ आसंगिकं परिसमाप्य किंदर्विहोमाः पूर्ववंतउतापूर्वा इति विचार्यते। तत्रा
श्रुतेतिकर्त्तव्यताकत्वादव्यक्तत्वाच्च सौमिको विध्यंतः प्रवर्त्तते। यागहोमत्वेनात्यंतविसदृशत्वाद्धो
मानामेवाग्निहोत्रनारिष्ठादीनां धर्मवतां सन्निधाना तदतिक्रमेण सोमयागाश्रयणं युक्तं। अ
स्तु तत्परत्वमिति कृत्स्नमेव। नैवं। नारिष्ठांगभूतानामिध्मादीनां त्र्यंबकहोमेष्वनावदर्शनात्। लिंगा
तरा णि च दर्शितानि दर्विहोमानामपूर्वत्वं गमयंति। तस्मादपूर्वाः। ५। स संक्षेपविस्तारकः साप
वादः सहेतुकोनुमानात्तथा नामधेयात्। अधीताध्यवाकयात्प्रसिद्धोतिदेशः करिष्यामहे ततः परं
तूहचिंतां॥ ॥इति श्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायामष्टमाध्यायस्य चतुर्थः पा
दः॥ ॥अष्टमाध्यायः समाप्तः॥ ॥शुभमस्तु॥ ॥छ। राम। छ। छ। राम। छ। राम। छ। राम। छ। राम। छ।
अत्र सूत्रस्थत्वात् दर्विहोमो यज्ञाभिधानमिति सूत्रेण दर्विहोमशब्दो नामधेयमिस्कन्कासलौकिकानामुत वैदिकानामिस्यादि चिंताद
यं कृत्वा पुनर्गुणविधिलमाशंक्य तत् ... योगिकस्यापि तत्रस्य तदुपदेशो... विरवस
वेन नामधेयत्वमिति नाधेयपादेउक्तत्वात् ... तेरणनाम ... साधनायोगादिसत आरम्यतिति· शीकामा त्रमेतन्नलुना

राम
८

© Dharmartha Trust J&K. Digitized by eGangotri